# नलोपाख्यानम्

## 10

नल उवाच।

यथा राज्यं पितुस्ते तत्तथा मम न संशयः।

न तु तत्र गमिष्यामि विषमस्थः कथंचन॥ ३-५९-१॥

कथं समृद्धो गत्वाहं तव हर्षविवर्धनः।

परिच्युतो गमिष्यामि तव शोकविवर्धनः॥ ३-५९-२॥

बृहदश्व उवाच।

इति ब्रुवन्नलो राजा दमयन्तीं पुनः पुनः।

सान्त्वयामास कल्याणीं वाससो ऽर्धेन संवृताम्॥ ३-५९-३॥

तावेकवस्त्रसंवीतावटमानावितस्ततः।

क्षुत्पिपासापरिश्रान्तौ सभां कांचिदुपेयतुः॥ ३-५९-४॥

तां सभामुपसंप्राप्य तदा स निषधाधिपः।

वैदर्भ्या सहितो राजा निषसाद महीतले॥ ३-५९-५॥

स वै विवस्त्रो मलिनो विकचः पांसुगुण्ठितः।

दमयन्त्या सह श्रान्तः सुष्वाप धरणीतले॥ ३-५९-६॥

दमयन्त्यपि कल्याणी निद्रयापहृता ततः।

सहसा दुःखमासाद्य सुकुमारी तपस्विनी॥ ३-५९-७॥

सुप्तायां दमयन्त्यां तु नलो राजा विशां पते।

शोकोन्मथितचित्तात्मा न स्म शेते यथा पुरा॥ ३-५९-८॥

स तद्राज्यापहरणं सुहृत्त्यागं च सर्वशः।

वने च तं परिध्वंसं प्रेक्ष्य चिन्तामुपेयिवान्॥ ३-५९-९॥

किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः।

किं नु मे मरणं श्रेयः परित्यागो जनस्य वा॥ ३-५९-१०॥

मामियं ह्यनुरक्तेदं दुःखमाप्नोति मत्कृते।

मद्विहीना त्वियं गच्छेत्कदाचित्स्वजनं प्रति॥ ३-५९-११॥

मया निःसंशयं दुःखमियं प्राप्स्यत्यनुत्तमा।

उत्सर्गे संशयः स्यात्तु विन्देतापि सुखं क्वचित्॥ ३-५९-१२॥

स विनिश्चित्य बहुधा विचार्य च पुनः पुनः।

उत्सर्गं मन्यते श्रेयो दमयन्त्या नराधिपः॥ ३-५९-१३॥

सो ऽवस्त्रतामात्मनश्च तस्याश्चाप्येकवस्त्रताम्।

चिन्तयित्वाध्यगाद्राजा वस्त्रार्धस्यावकर्तनम्॥ ३-५९-१४॥

कथं वासो विकर्तेयं न च बुध्येत मे प्रिया।

चिन्त्यैवं नैषधो राजा सभां पर्यचरत्तदा॥ ३-५९-१५॥

परिधावन्नथ नल इतश्चेतश्च भारत।

आससाद सभोद्देशे विकोशं खड्गमुत्तमम्॥ ३-५९-१६॥

तेनार्धं वाससश्छित्त्वा निवस्य च परंतपः।

सुप्तामुत्सृज्य वैदर्भीं प्राद्रवद्गतचेतनः॥ ३-५९-१७॥

ततो निबद्धहृदयः पुनरागम्य तां सभाम्।

दमयन्तीं तथा दृष्ट्वा रुरोद निषधाधिपः॥ ३-५९-१८॥

यां न वायुर्न चादित्यः पुरा पश्यति मे प्रियाम्।

सेयमद्य सभामध्ये शेते भूमावनाथवत्॥ ३-५९-१९॥

इयं वस्त्रावकर्तेन संवीता चारुहासिनी।

उन्मत्तेव वरारोहा कथं बुद्धा भविष्यति॥ ३-५९-२०॥

कथमेका सती भैमी मया विरहिता शुभा।

चरिष्यति वने घोरे मृगव्यालनिषेविते॥ ३-५९-२१॥

गत्वा गत्वा नलो राजा पुनरेति सभां मुहुः।

आकृष्यमाणः कलिना सौहृदेनापकृष्यते॥ ३-५९-२२॥

द्विधेव हृदयं तस्य दुःखितस्याभवत्तदा।

दोलेव मुहुरायाति याति चैव सभां मुहुः॥ ३-५९-२३॥

dola *f* – качели;

सो ऽपकृष्टस्तु कलिना मोहितः प्राद्रवन्नलः।

सुप्तामुत्सृज्य तां भार्यां विलप्य करुणं बहु॥ ३-५९-२४॥

नष्टात्मा कलिना स्पृष्टस्तत्तद्विगणयन्नृपः।

जगामैव वने शून्ये भार्यामुत्सृज्य दुःखितः॥ ३-५९-२५॥